# Mahatripurasundari Ashtottarashatanama Stotram

# महात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Mahatripurasundari Ashtottarashatanama Stotram

File name : mahAtripurasundaryaShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, devii, stotra, devI, dashamahAvidyA

Location : doc_devii

Transliterated by : Srikrishnan Sankarasubramanian

Proofread by : Srikrishnan Sankarasubramanian, Rajesh Thyagarajan

Description-comments : Kalivilasatantra, See corresponding nAmAvalI

Latest update : March 23, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 8, 2024

*sanskritdocuments.org*

# महात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्

(अथ श्रीकालीविलासतन्त्रे एकादशपटलः ।)
श्रीदेव्युवाच ।
महात्रिपुरसुन्दर्याः शतनामानि साम्प्रतम् ।
कथ्यन्तां मे दया नाथ यद्यप्यस्ति तदा मयि ॥ १॥

श्रीतामस उवाच ।
शृणु चार्वङ्गि वक्ष्यामि सावधानाऽवधारय ।
यन्त्रोक्तं सर्वतन्त्रेषु अधुना निगदामि ते ॥ २॥

अस्य श्रीत्रिपुरसुन्दरी-शतनामस्तोत्रस्य परं
ब्रह्मऋषिर्गायत्रीच्छन्दो महात्रिपुरसुन्दरी
देवता धर्मार्थ-काम-मोक्षेषु विनियोगः ॥

ॐ महामाया महादेवी मेनका मेघगर्जिनी ।
मोहिनी हरिणाक्षी च हारिणी हरवल्लभा ॥ ३॥

हरिपूज्या हराराध्या हेरा हेमवती हरा ।
हेमरूपा च हेमा च हेमाभरणभूषिता ॥ ४॥

रङ्गिणीरङ्गरूपा च राधा वृन्दावनेश्वरी ।
वलावलवती बाला बालिका वेशधारिणी ॥ ५॥

वयस्था वेशधा चैव विद्या श्रीविष्णुपूजिता ।
वियद्गङ्गा व्योमगङ्गा विशाला विश्वमोहिनी ॥ ६॥

रङ्गिणी रङ्गणीया च रणभूमिकतालया ।
पूता पवित्रा परमा परा पुण्याविभूषण ॥ ७॥

पुण्यनाम्नी पापहन्त्री पापारिः पापनाशिनी ।
पुण्यदा पुण्यकीर्त्तिश्च पुण्यश्लोका च पावनी ॥ ८॥

रूपमाला रूपवती रसावेशपरिच्छदा ।
रक्षणी रक्षणीया च रुक्ममाला विभूषणा ॥ ९॥

रसरूपा रसोल्लासा रसानघपरिच्छदा(१) ।
रम्भारामा च रम्या च रमणी रामपूजिता ॥ १०॥

सौभाग्या सुवशासाध्वी सत्यासत्यस्वरूपिणी ।
त्रिगुणात्रिगुणाराध्या त्रिवेदी त्रिगुणेश्वरी ॥ ११॥

त्रिमूर्तिस्त्रिदशाराध्या त्रयोत्रिदिवसुन्दरी ।
सुखदा सुमुखी सुभ्रुः सुवेशी वेशधारिणी ॥ १२॥

आनन्दा नन्दिनी नन्दा परमानन्दरूपिणी ।
ईश्वरी ईश्वराराध्या रक्तपद्मसमप्रभा ॥ १३॥

राकारम्या रक्तदेहा रमणी ब्रह्ममोहिनी ।
योगिनीनां स्वरूपा च ब्रह्माण्डजननी परा ॥ १४॥

नामाक्षरात् समुद्धृत्य दशनाम इतीरितम् ।
चन्दोऽस्य च प्रवक्ष्यामि शृणु पार्वति सारदे(२) ॥ १५॥

अस्य श्रीत्रिपुरसुन्दरी शतनामस्तोत्रस्य परं
ब्रह्मऋषिः श्रीमहात्रिपुरसुन्दरी
देवता-धर्मार्थकाममोक्षेषु विनियोगः ॥

दशधा मन्त्रमुच्चार्य ततश्छन्दः पठेत्सुधीः ।
ततः स्तोत्रं पठित्वा तु सर्वसिद्धीश्वरः कलौ ॥ १६॥

भवत्येव न सन्देहः त्रिसन्ध्यं कमलेक्षणे ।
लक्षावर्त्तनमात्रेण अष्टैश्वर्यमयो भवेत् ॥ १७॥

मद्यञ्च मैथुनं भद्रे परयोनौ परित्यजेत् ।
परयोनौ महेशानि रेतः पातञ्च वर्ज्जयेत् ॥ १८॥

रेतः पातान्मद्यपानात् सिद्धिहानिः पदे पदे ॥ १९॥

इति श्रीकालीविलासतन्त्रे त्रिपुरसुन्दरी शतनामस्तोत्रं समाप्तम् ।
ॐ तत्सदित्यादि ।

इति श्रीकालीविलासतन्त्रे एकादशपटलः समाप्तः ।

१. “रसानघपरिच्छदा” इत्यव रसालयपरिच्छदा
इति पाठः क्वचित पुस्तके ।

२. “सारदे” इत्यत्र “सादर” इति क्वचित् पुस्तके पाठः ।

Encoded Srikrishnan Sankarasubramanian

Proofread by Srikrishnan Sankarasubramanian and Rajesh Thyagarajan

---

*Mahatripurasundari Ashtottarashatanama Stotram*

pdf was typeset on April 8, 2024

Please send corrections to *sanskrit@cheerful.com*